# ॥ श्रीराजश्यामला सहस्रनाम स्तोत्रम् ॥



श्रीमात्रे नमः

श्रीप्रासाद् परमेश्वराय नमः

श्रीलक्ष्मीनृसिंहाय नमः

ॐ अस्य श्रीराजश्यामला सहस्रनाम स्तोत्र महामन्त्रस्य सदाशिव ऋषिः अनुष्टुप् छन्दः श्रीराजमातङ्गीश्वरी देवता ऐं बीजं सौः शक्तिः क्लीं कीलकं श्रीराजश्यामला कृपाकाटाक्ष प्राप्त्यर्थे श्रीविद्याङ्गत्वेन जपे विनियोगः ॥ [कृष्णसप्तम्यां विशेषतः]

*षडङ्गादिमन्त्राः सर्वजनादयः अष्टौ सप्तैकादश दश पुनर्दशाष्टाविंशतिखण्डाः*

*त्रितारीकुमारीवागादयः सजातयः सामान्यमनुयुक्ताः । बालया वा*

**ध्यानम्**

अम्सालम्बिविनीलकुन्तललसत्कल्हारदामोज्ज्वलाम्

आनन्दार्धनिमीलिताक्षियुगळामापीनतुङ्गस्तनीम् ।

नीपानोकहवाटिकान्तरलसत्सौवर्णपीठस्थिताम्

वीणावादनलालसां शुकवतीं ध्यायेन्महाश्यामलाम् ॥

*लमित्यादि पञ्चपूजा*

सप्तदशवारं द्वाविंशत्यक्षरं स्तवस्योत्कीलनं जप्त्वा -

ऐं ह्रीं श्रीं ऐं क्लीं सौः ऐं

सौभाग्यलक्ष्मीः सौन्दर्यनिधिः समरसप्रिया ।

सर्वकल्याणनिलया सर्वेशी सर्वमङ्गळा ॥ १ ॥

सर्ववश्यकरी सर्वा सर्वमङ्गळकारिणी ।
सर्वविद्यादानदक्षा सङ्गतोपनिषत्प्रिया ॥ २ ॥

सर्वभूतहृदावासा सर्वगीर्वाणपूजिता ।
समृद्धा सङ्गमुदिता सर्वलोकैकसंश्रया ॥ ३ ॥

सप्तकोटिमहामन्त्रस्वरूपा सर्वसाक्षिणी ।
सर्वाङ्गसुन्दरी सर्वगता सत्यस्वरूपिणी ॥ ४ ॥

समा समयसम्वेद्या समयज्ञा सदाशिवा ।
सङ्गीतरसिका सर्वकलामयशुकप्रिया ॥ ५ ॥

चन्दनालेपसर्वाङ्गी सच्चिदानन्दरूपिणी ।
कदम्बवाटीनिलया कमलाकान्तसेविता ॥ ६ ॥

कटाक्षोत्पन्नकन्दर्पा कटाक्षितमहेश्वरा ।
कल्याणी कमलासेव्या कल्याणाचलवासिनी ॥ ७ ॥

कान्ता कन्दर्पजननी करुणारससागरा ।
कलिदोषहरा काम्या कामदा कामरूपिणी ॥ ८ ॥

कदम्बकलिकोत्तम्सा कदम्बकुसुमप्रिया ।
कदम्बमालारसिका कामाक्षी कमलासना ॥ ९ ॥

कम्बुकण्ठी कलालापा कमलासनपूजिता ।
कात्यायनी केळिपरा कमलाक्षसहोदरी ॥ १० ॥

कमलाक्षी कलारूपा कोकशाबकुचद्वया ।
कोमला कोकिलालापा कुमारजननी शिवा ॥ ११ ॥

सर्वज्ञा सततोन्मत्ता सर्वैश्वर्यप्रदायिनी ।
सुधाप्रिया सुराराध्या सुकेशी सुरसुन्दरी ॥ १२ ॥

शोभना शुद्धिदा शुद्धा शुद्धचैतन्यरूपिणी ।
वेदवेद्या वेदमयी विद्याधरगणार्चिता ॥ १३ ॥

वेदान्तसारा विश्वेशी विश्वरूपा विरूपिणी ।

विरूपाक्षप्रिया वन्द्या विन्ध्याचलनिवासिनी ॥ १४ ॥

वीणानादविनोदज्ञा वीणागानविशारदा ।
वीणावती बिन्दुरूपा ब्राह्मणी ब्राह्मणप्रिया ॥ १५ ॥

पार्वती परमाऽचिन्त्या पराशक्तिः परात्परा ।
परानन्दा परेशानी पराविद्या पराऽपरा ॥ १६ ॥

भक्तिप्रिया भक्तिगम्या भक्तानां परमागतिः ।
भवा भवप्रिया भीरुः भवसागरतारिणी ॥ १७ ॥

भयघ्नी भावदा भव्या भामिनी भक्तपालिनी ।
भेदशून्या भेदहन्त्री भावना मुनिभाविता ॥ १८ ॥

माया महेश्वरी मान्या मातङ्गी मलयालया ।
महनीया मदोन्मत्ता मन्त्रिणी मन्त्रनायिका ॥ १९ ॥

महानन्दा मनोगम्या मतङ्गकुलमण्डना ।
मनोज्ञा मानिनी माध्वी सिन्धुमध्यकृतालया ॥ २० ॥

मधुव्रता मधुप्रोता माध्वीरसमदालसा ।
पूर्णचन्द्राभ्रवदना पूर्णा पुण्यफलप्रदा ॥ २१ ॥

पुलोमजार्चिता पूज्या पुरुषार्थप्रदायिनी ।
नारायणी नादरूपा नादब्रह्मस्वरूपिणी ॥ २२ ॥

नित्या नवनवाकारा नित्यानन्दा निराकुला ।
निटिलाक्षप्रिया नेत्री नीलेन्दीवरलोचना ॥ २३ ॥

तमालकोमलाकारा तरुणी तनुमध्यमा ।
तटित्पिशङ्गवसना तटित्कोटिसमद्युतिः ॥ २४ ॥

मधुरा मङ्गळा मेध्या मधुपानप्रिया सती ।
चित्कला चारुवदना सुखरूपा सुखप्रदा ॥ २५ ॥

कूटस्था कौलिनी कूर्मपीठस्था कुटिलालका ।
शान्ता शान्तिमती शान्तिः श्यामला श्यामलाकृतिः ॥ २६ ॥

शंखिनी शाङ्करी शैवी शंखकुण्डलमण्डिता ।
कुन्ददन्ता कोमलाङ्गी कुहरा कुलयोगिनी ॥ २७ ॥

निगर्भयोगिनीसेव्या निरन्तरसुखप्रिया ।
शिवदूती शिवकरी जटिनी धूर्जटिप्रिया ॥ २८ ॥

शाम्भवी योगनिलया परा चैतन्यरूपिणी ।
दहराकाशनिलया धर्मरूपा दरस्मिता ॥ २९ ॥

सम्पत्करी गजारूढा सान्द्रानन्दा सुरेश्वरी ।
चम्पकोद्भासितकचा चन्द्रशेखरवल्लभा ॥ ३० ॥

चारुरूपा चारुरतिः चन्द्रिका शम्भुमोहिनी ।
विमला विदुषी वाणी कमला कमलालया ॥ ३१ ॥

करुणापूर्णहृदया कामेशी कम्बुकन्धरा ।
राजराजेश्वरी राजमातङ्गी राजवल्लभा ॥ ३२ ॥

सचिवा सचिवेशानी सचिवत्वप्रदायिनी ।

पञ्चबाणार्चिता बाला पञ्चमी परदेवता ॥ ३३ ॥

उमा हैमवती गौरी सङ्गीतज्ञा सरस्वती ।
कविप्रिया काव्यकला कौलसिद्धिप्रदायिनी ॥ ३४ ॥

ललितामन्त्रिणी रम्या ललिताराज्यपालिनी ।
ललितासेवनपरा ललिताज्ञावशंवदा ॥ ३५ ॥

ललिताकार्यचतुरा ललिताभक्तपालिनी ।
ललितार्धासनारूढा लावण्यरसशेवधिः ॥ ३६ ॥

रञ्जनी लालितशुका नीलचूलीभरान्विता ।
रागिनी रमणी रामा रतिराजसुखप्रिया ॥ ३७ ॥

भोगदा भोग्यदा भूमिप्रदा भूषणशालिनी ।
पुण्यलभ्या पुण्यकीर्तिः पुरन्दरपुरेश्वरी ॥ ३८ ॥

ऐंकारी सर्वजननी क्लींकारी क्लिन्नरूपिणी ।
भानुमण्डलमध्यस्था भामिनी भारती धृतिः ॥ ३९ ॥

नारायणार्चिता नाथा नादिनी नादरूपिणी ।
पञ्चकोणस्थिता लक्ष्मीः पुराणी पुरवैरिणी ॥ ४० ॥

चक्रस्थिता चक्र रूपा चक्रिणी चक्रनायिका ।
षट्चक्रमण्डलान्तस्था ब्रह्मचक्रनिवासिनी ॥ ४१ ॥

अन्तरभ्यर्चनप्रीता बहिरर्चनलोलुपा ।
पञ्चाशत्पीठमध्यस्था मातृकावर्णरूपिणी ॥ ४२ ॥

महादेवी महाशक्तिः महामाया महागतिः ।
महारूपा महादीप्तिः महालावण्यशालिनी ॥ ४३ ॥

माहेन्द्री मदिरातृप्ता मदिरासिन्धुवासिनी ।
मदिरामोदवदना मदिरापानतत्परा ॥ ४४ ॥

दुरितघ्नी दुःखहन्त्री दूतीयागरतिप्रिया ।
वीरसेव्या विघ्नहरा योगिणीगणसेविता ॥ ४५ ॥

निजवीणारवानादनिमीलितविलोचना ।
वज्रेश्वरी वश्यकरी सर्वचित्तविमोहिनी ॥ ४६ ॥

शबरी शबराराध्या शाबरीमन्त्रसंस्तुता ।
त्रिपुरामन्त्रजपिनी त्रिपुरार्चनतत्परा ॥ ४७ ॥

त्रिलोकेशी त्रयीमाता त्रिमूर्तिः त्रिदशेश्वरी ।
ऐंकारिणी सर्वमाता क्लींकारी संविदीश्वरी ॥ ४८ ॥

भण्डसोदरसंहर्त्री भण्डसैन्यविनाशिनी ।
बोधा बोधकरी बोध्या बुधाराध्या पुरातनी ॥ ४९ ॥

गेयचक्ररथारूढा गुरुमूर्तिः कुलाङ्गना ।
गन्धर्वशास्त्रमर्मज्ञा गन्धर्वगणसेविता ॥ ५० ॥

जगन्माता जयकरी जननी जनसेविता ।
शिवाराध्या शिवार्धाङ्गी शिंजन्मञ्जीरमण्डिता ॥ ५१ ॥

विपञ्चीकलनिक्वाणविमोहितजगत्त्रया ।

भैरवप्रेमनिलया भैरवी भासुराकृतिः ॥ ५२ ॥

पुष्पिणी पुष्पनिलया पुण्यश्रवणकीर्तना ।
कुरुकुल्ला कुण्डलिनी वागीशी नकुलेश्वरी ॥ ५३ ॥

व्योमकेशी गिरिसुता वार्ताळी वरपूजिता ।
वारुणीमदरक्ताक्षी वन्दारुवरदायिनी ॥ ५४ ॥

कटाक्षस्यन्दिकरुणा कन्दर्पमदवर्धिनी ।
दूर्वाश्यामा दुष्टहन्त्री दुष्टग्रहविभेदिनी ॥ ५५ ॥

सर्वशत्रुक्षयकरी सर्वसम्पत्प्रवर्धिनी ।
कबरीशोभिकल्हारा कलशिंजितमेखला ॥ ५६ ॥

मृणालतुल्यदोर्वल्ली मृडाणी मृत्युवर्जिता ।
मृदुला मृत्युसंहर्त्री मञ्जुला मञ्जुहासिनी ॥ ५७ ॥

कर्पूरवीटीकबळा कमनीयकपोलभृत् ।
कर्पूरक्षोदिग्धाङ्गी कर्तृकारणवर्जिता ॥ ५८ ॥

अनादिनिधना धात्री धात्रीधरकुलोद्भवा ।
स्तोत्रप्रिया स्तुतिमयी मोहिनी मोहकारिणी ॥ ५९ ॥

जीवरूपा जीवकरी जीवन्मुक्तिप्रदायिनी ।
भद्रपीठस्थिता भद्रा भद्रदा भर्गगामिनी ॥ ६० ॥

भगानन्दा भगमयी भगलिङ्गा भगेश्वरी ।
मत्तमातङ्गगमना मतङ्गकुलमञ्जरी ॥ ६१ ॥

राजहंसगतिः राज्ञी राजराजसमर्चिता ।
सर्वात्मिका हृषीकेशी सर्वपापविनाशिनी ॥ ६२ ॥

सर्वरोगहरा सन्ध्या धर्मिणी धर्मरूपिणी ।
पतिव्रता पाशहन्त्री परमात्मस्वरूपिणी ॥ ६३ ॥

आचारलभ्या स्वाचारा खेचरी योनिरूपिणी ।
पण्डिता पण्डिताराध्या पाषण्डमतभञ्जिनी ॥ ६४ ॥

श्रीकरी श्रीमती रौद्री बिन्दुनादस्वरूपिणी ।
अपर्णा हिमवत्पुत्री दुर्गा दुर्गार्तिहारिणी ॥ ६५ ॥

व्यालोलशंखताटङ्कविलसद्गण्डपालिका ।
सुधाकल्लोलसल्लापा सिन्दूरतिलकोज्ज्वला ॥ ६६ ॥

आलक्तककालक्तपादा नन्दनोद्यानवासिनी ।
वासन्ती गुह्यचारित्रा वसन्तसमयप्रिया ॥ ६७ ॥

ध्याननिष्ठा ध्यानगम्या ध्यानध्येयस्वरूपिणी ।
दारिद्र्यहन्त्री दौर्भाग्यशमनी दानवान्तका ॥ ६८ ॥

तीर्थरूपा त्रिनयना तुर्या दोषविवर्जिता ।
मोदप्रदायिनी मेधा मेदिनी मदशालिनी ॥ ६९ ॥

मधुकैटभसंहर्त्री माधवी माधवप्रिया ।
महिमा महितोदारा शर्वाणी शर्मदायिनी ॥ ७० ॥

रुद्राणी रुचिरा राका रुक्मभूषणभूषिता ।

अम्बिका जगतां धात्री विशालाक्षी वियत्प्रसूः ॥ ७१ ॥

सूक्ष्मस्वरूपिणी सौम्या सुरुचिः सुलभा शुभा ।
भवानी पार्वती काली दक्षिणा दक्षकन्यका ॥ ७२ ॥

हव्यवाहा हविर्भोक्त्री हारिणी चाज्यधारिणी ।
संसारतारिणी नित्या सर्वेशी समरप्रिया ॥ ७३ ॥

स्वप्नस्थिता जागरिणी सुषुप्ता विश्वरूपिणी ।
तैजसी प्राज्ञभावस्था चेतनाऽचेतनाकृतिः ॥ ७४ ॥

चिन्मात्रा चिद्घना चैत्या चिच्छाया चिच्छरीरिणी ।
निवृत्तिरूपिणी शान्तिः प्रतिष्ठा नित्यपुष्पिणी ॥ ७५ ॥

दिव्यरूपा शान्त्यतीता कलापञ्चकरूपिणी ।
ह्रींकारी ह्रींमती हृद्या हृच्छाया हरिवाहना ॥ ७६ ॥

मूलप्रकृतिरव्यक्ता व्यक्ताव्यक्तविनोदिनी ।
यज्ञरूपा यज्ञभोक्त्री यज्ञाङ्गी यज्ञरूपिणी ॥ ७७ ॥

दक्षिणा क्षपणा क्षामा क्षितिः शान्तिः श्रुतिः स्मृतिः ।
एकानेका कामकला कल्या कालस्वरूपिणी ॥ ७८ ॥

दक्षा दाक्षायणी दीक्षा दक्षयज्ञविनाशिनी ।
गायत्री गगनाकारा गीर्देवी गरुडासना ॥ ७९ ॥

सावित्री सकलाध्यक्षा ब्रह्माणी ब्राह्मणप्रिया ।
जगन्नाथा जगन्मूर्तिः जन्ममृत्युनिवारिणी ॥ ८० ॥

दृग्रूपा सृष्टिनिलया दुष्टहन्त्री चिरन्तना ।
विज्ञात्री विपुला वेद्या वृद्धा वर्षीयसी मही ॥ ८१ ॥

अध्वा कुहरिणी गुह्या गवांपतिनिषेविता ।
नन्दिनी नलिनी नित्या नीतिः नयविशारदा ॥ ८२ ॥

गताऽगतज्ञा गहना गान्धर्वी गर्वशालिनी ।
प्रियव्रता प्रमाणज्ञा प्रमा प्राणा प्रियंवदा ॥ ८३ ॥

अशरीरा शरीरस्था नामरूपविवर्जिता ।
नित्यमुक्ता नित्यशुद्धा निर्लेपा निरवग्रहा ॥ ८४ ॥

इच्छाज्ञानक्रियाशक्तिः इन्दिरा बन्धुराकृतिः ।
मनोरथप्रदा मुख्या मानिनी मानवर्जिता ॥ ८५ ॥

नीरागा निरहङ्कारा निर्नाशा निरुपप्लवा ।
विचित्रा चित्रचारित्रा निष्कला निगमालया ॥ ८६ ॥

ब्रह्मविद्या ब्रह्मनाडी बन्धहन्त्री बलिप्रिया ।
सुलक्षणा लक्षणज्ञा सुन्दरभ्रूलताञ्चिता ॥ ८७ ॥

सुमित्रा मालिनी सीमा मुद्रिणी मुद्रिकान्विता ।
रजस्वला रम्यमूर्तिः जराजन्मविवर्जिता ॥ ८८ ॥

पद्मालया पद्मपीठा पद्मिनी पद्मपाणिनी ।
विश्वम्भरा विश्वगर्भा विश्वेशी विश्वतोमुखी ॥ ८९ ॥

अद्वितीया सहस्राक्षी विराड्रूपा विमोहिनी ।

शास्त्ररूपा शास्त्रकरी शास्त्रज्ञा शास्त्रधारिणी ॥ ९० ॥

वेदकृद्वेदविद्वेद्या वित्तज्ञा वित्तशालिनी ।
विशदा वैष्णवी वृद्धिः वैरिञ्ची वाक्प्रदायिनी ॥ ९१ ॥

विख्याता वामना वीरा विश्वनाथा विशारदा ।
मृडेश्वरी मुण्डमाला कालकङ्कालरूपिणी ॥ ९२ ॥

महेश्वरप्राणनाडी महेश्वरपतिव्रता ।
ब्रह्माण्डमालिनी पद्मा मतङ्गमुनिसेविता ॥ ९३ ॥

ईश्वरी चण्डिका चण्डी नियन्त्री निगमस्थिता ।
सर्वान्तर्यामिनी साध्या सन्ततिः सन्ततिप्रदा ॥ ९४ ॥

तमालपल्लवश्यामा ताम्रोष्ठी ताण्डवप्रिया ।
नटी लास्यकरी रम्भा नटराजप्रियाङ्गना ॥ ९५ ॥

अनङ्गरूपानङ्गश्रीः अनङ्गैश्वर्यसुन्दरी ।
साम्राज्यदायिनी सिद्धा सिद्धेशी सिद्धिदायिनी ॥ ९६ ॥

सिद्धमाता सिद्धपूज्या सिद्धार्था वसुदायिनी ।
भक्तिमत्कल्पलतिका भक्तिदा भक्तवत्सला ॥ ९७ ॥

पञ्चशक्त्यर्चितपदा परमार्थस्वरूपिनी ।
अज्ञानतिमिरज्योत्स्ना नित्याह्लादा निरञ्जना ॥ ९८ ॥

मुग्धा मन्दस्मिता मैत्री मञ्जुकेशी मधुप्रिया ।
कलापिनी काव्यकला कामकेळिः कलावती ॥ ९९ ॥

अखण्डा निरहङ्कारा प्रधानपुरुषेश्वरी ।
रहःपूज्या रहःकेळी रहःस्तोत्रा रहःक्रिया ॥ १०० ॥

शरण्या शर्वरी गुह्या गुहान्तस्था गुहप्रसूः ।
स्वसंवेद्या स्वप्रकाशा स्वात्मस्था स्वर्गदायिनी ॥ १०१ ॥

निष्प्रपञ्चा निराधारा नित्याऽनित्यस्वरूपिणी ।
निर्मला साक्षिणी नित्या निष्कामा निष्कला कला ॥ १०२ ॥

अष्टमूर्तिरमोघेच्छा साध्यादिगणसेविता ।

यन्त्ररूपा तन्त्ररूपा मन्त्ररूपा मनोन्मनी ॥ १०३ ॥

शिवकामेश्वरी देवी चिद्रूपा चित्तरङ्गिणी ।

चित्प्रकाशा चित्स्वरूपा चिन्मूर्तिः चिन्मयी चितिः ॥ १०४ ॥

मूर्तरूपा मोहहन्त्री मुख्या क्रोडमुखीसखी ।

ज्ञानज्ञातृज्ञेयरूपा व्योमाकारा विश्वासिनी ॥ १०५ ॥

विमर्शरूपिणी वश्या विधानज्ञा विजृम्भिता ।

केतकीकुसुमामोदा कस्तूरीतिलकोज्ज्वला ॥ १०६ ॥

मृगाक्षी रसिका मृग्या मृगनाभिसुगन्धिनी ।

यक्षकर्दमलिप्ताङ्गी यक्षिणी यक्षपूजिता ॥ १०७ ॥

लसन्माणिक्यकटका केयूरोज्ज्वलदोर्लता ।

सिन्दूरराजसीमन्ता सुभ्रूवल्ली सुनासिका ॥ १०८ ॥

कैवल्यदा कान्तिमाला कठोरकुचमण्डला ।

तलोदरी तमोहन्त्री त्रयस्त्रिंशत्पुरात्मिका ॥ १०९ ॥

स्वयम्भूकुसुमामोदा स्वयम्भूपरिपूजिता ।
स्वाध्यायिनी सुराराध्या वीरश्रीः वीरपूजिता ॥ ११० ॥

द्राविणी विद्रुमाभोष्ठी वैरिणी विष्णुवल्लभा ।
हालामदोल्लसद्वाणी लोला लीलावती रतिः ॥ १११ ॥

लोपामुद्रार्चिता लक्ष्मीः अहल्यापरिसेविता ।
आब्रह्मकीटजानी कैलासगिरिवासिनी ॥ ११२ ॥

सिद्धेश्वरी निरातङ्का निष्कलङ्का जगन्मयी ।
आदिलक्ष्मीरमोघश्रीरच्युता तत्त्वरूपिणी ॥ ११३ ॥

नामजात्यादिरहिता नरनारायणार्चिता ।
गुह्योपनिषदुद्गीता लक्ष्मीवाणीनिषेविता ॥ ११४ ॥

चिच्चन्द्रमण्डलान्तस्था चिदेकरसरूपिणी ।
मतङ्गवरदा सिद्धा महायोगीश्वरी गुरुः ॥ ११५ ॥

गुरुप्रिया कुलाराध्या कुलसङ्केतपालिनी ।
अनङ्गशास्त्रतत्त्वज्ञा नानाविधरतिप्रिया ॥ ११६ ॥

निर्मला निरवद्याङ्गी नीतिज्ञा नीतिरूपिणी ।
व्यापिनी विबुधश्रेष्ठा कुलशैलकुमारिका ॥ ११७ ॥

विष्णुप्रसूर्वीरमाता नानामणिविराजिता ।
नायिका नगरीसंस्था नित्यतुष्टा नितम्बिनी ॥ ११८ ॥

पञ्चब्रह्ममयी पञ्चब्रह्मात्म्यैक्यस्वरूपिणी ।
अरुणोपनिषदुद्गीता सर्वानुग्रहकारिणी ॥ ११९ ॥

पवित्रा पावना पूता परमात्मस्वरूपिणी ।
सूर्येन्दुवह्निनयना शौरिपूज्या सुधाकरी ॥ १२० ॥

सुगात्री गात्ररहिता सुगुणा गुणवर्जिता ।
रक्षाकरी रम्यरूपा सात्विकी सत्त्वदायिनी ॥ १२१ ॥

विश्वातीता व्योमरूपा विमानस्था विधिप्रिया ।

आत्मभूरजिता जिष्णुरजा स्वाहा स्वधा सुधा ॥ १२२ ॥

नन्दिताशेषभुवना नामसङ्कीर्तनप्रिया ।

गुरुमूर्तिर्गुरुमयी गुरुपादार्चनप्रिया ॥ १२३ ॥

मानवी मन्त्रजननी महाभैरवपूजिता ।

नित्योत्सवा नित्यपुष्टा श्यामा यौवनशालिनी ॥ १२४ ॥

महानया महामूर्तिः महतीसौख्यसन्ततिः ।

पूर्णोदरी हविर्दात्री गणाराध्या गणेश्वरी ॥ १२५ ॥

गायिनी गर्वरहिता स्वेदबिन्दूल्लसन्मुखी ।

तुङ्गस्तनी तुलाशून्या कन्या कमलवासिनी ॥ १२६ ॥

शृङ्गाररूपा श्रीविद्या श्रीपादा श्रीनिवासिनी ।

त्रैलोक्यसुन्दरी बाला त्रैलोक्यजननी सुधा ॥ १२७ ॥

पञ्चक्लेशहरा पाशधारिणी पाशमोचिनी ।

पाषण्डहन्त्री पापघ्नी पार्थिवश्रीकरी कृतिः ॥ १२८ ॥

निरपाया सुधालापा सुलभा शोभनाकृतिः ।
महाबला भगवती भवरोगविनाशिनी ॥ १२९ ॥

भैरवाष्टकसंसेव्या ब्रह्माणीपरिपूजिता ।
वामादिशक्तिसहिता वारुणिमदविह्वला ॥ १३० ॥

वरिष्ठा वश्यदा वश्या भक्तार्तिदमनी दितिः ।
वैराग्यनिलया ज्ञानदायिनी ज्ञानविग्रहा ॥ १३१ ॥

सर्वदोषविनिर्मुक्ता शङ्करार्धशरीरिणी ।
सर्वेश्वरी सर्वमाता स्वयंज्योतिःस्वरूपिणी ॥ १३२ ॥

क्षीरसागरमध्यस्था महाभुजगशायिनी ।
कामधेनुर्बृहद्गर्भा योगनिद्रा वसुन्धरा ॥ १३३ ॥

महेन्द्रोपेन्द्रजननी मतङ्गकुलसम्भवा ।
मतङ्गजातिसंपूज्या मतङ्गकुलदेवता ॥ १३४ ॥

सह्यविद्या वश्यविद्या सिद्धविद्या शिवाङ्गना ।

सुमङ्गला रत्नगर्भा सूर्यमाता सुधाशना ॥ १३५ ॥

खड्गमण्डलसंपूज्या सालग्रामनिवासिनी ।

दुर्जया दुष्टदमनी दुर्निरीक्ष्या दुरत्यया ॥ १३६ ॥

शंखचक्रगदाहस्ता विष्णुशक्तिर्विमोहिनी ।

योगमाया योगगम्या योगनिष्ठा सुधाप्रदा ॥ १३७ ॥

समाधिनिष्ठसंसेव्या सर्वभेदविवर्जिता ।

साधारणी सरोजाक्षी  सर्वज्ञा सर्वसाक्षिणी ॥ १३८ ॥

महाशक्तिः महोदारा महामङ्गलदेवता ।

कलौ कृतावतरणा कलिकल्मषनाशिनी ॥ १३९ ॥

सर्वदा सर्वजननी निरीशा सर्वतोमुखी ।

सुगुणा सर्वतोभद्रा सुस्थिरा स्थाणुवल्लभा ॥ १४० ॥

चराचरजगद्रूपा चेतनाऽचेतनाकृतिः ।
महेश्वरप्राणनाथा महाभैरवमोहिनी ॥ १४१ ॥

मञ्जुला यौवनोन्मत्ता महापातकनाशिनी ।
महानुभावा माहेन्द्री महामरकतप्रभा ॥ १४२ ॥

सर्वशक्त्यासना शक्तिः निरालोका निरिन्द्रिया ।
समस्तदेवतामूर्तिः समस्तसमयार्चिता ॥ १४३ ॥

सुवर्चला वियन्मूर्तिः पुष्करा नित्यपुष्पिणी ।
नीलोत्पलदलश्यामा महाप्रळयसाक्षिणी ॥ १४४ ॥

सङ्कल्पसिद्धा सङ्गीतरसिका रसदायिनी ।
अभिन्ना ब्रह्मजननी कालक्रमविवर्जिता ॥ १४५ ॥

अजपा जाड्यरहिता प्रसन्ना भगवत्प्रिया ।
श्रीचक्रविद्या श्रीदेवी श्रीविद्या श्रीविधायिनी ॥ १४६ ॥

इन्दिरा जगतीकन्दा सच्चिदानन्दकन्दली ।

सदाताम्बूलरसिका पुष्पशय्याधिवासिनी ॥ १४७ ॥

मल्लिकाकुड्मलामोदधम्मिल्ला सुरतप्रिया ।
कस्तूरीतिलकोपेता स्तनभारविराजिता ।
नित्यकल्याणनिलया वरदा श्यामलाम्बिका ॥ १४८ ॥

॥ इति श्रीसौभाग्यलक्ष्मीकल्पे लक्ष्मीनारायणसंवादे अष्टसप्ततितमे खण्डे श्यामलास्तवः ॥

## || śrīrājaśyāmalā sahasranāma stotram ||

śrīmātre namaḥ
śrīprāsāda parameśvarāya namaḥ
śrīlakṣmīnṛsiṁhāya namaḥ

om asya śrīrājaśyāmalā sahasranāma stotra mahāmantrasya sadāśiva ṛṣiḥ anuṣṭup chandaḥ śrīrājamātaṅgīśvarī devatā aiṁ bījaṁ sauḥ śaktiḥ klīṁ kīlakaṁ śrīrājaśyāmalā kṛpākāṭākṣa prāptyarthe śrīvidyāṅgatvena jape viniyogaḥ || [kṛṣṇasaptamyāṁ viśeṣataḥ]

[ ṣaḍaṅgādimantrāḥ sarvajanādayaḥ aṣṭau saptaikādaśa daśa punardaśāṣṭāviṁśatikhaṇḍāḥ tritārīkumārīvāgādayaḥ sajātayaḥ sāmānyamanuyuktāḥ| bālayā vā ]

**dhyānam**
amsālambivinīlakuntalalasatkalhāradāmojjvalām

ānandārdhanimīlitākṣiyugaḻāmāpīnatuṅgastanīm |
nīpānokahavāṭikāntaralasatsauvarṇapīṭhasthitām
vīṇāvādanalālasāṁ śukavatīṁ dhyāyenmahāśyāmalām ||

[lamityādi pañcapūjā]

[saptadaśavāraṁ dvāviṁśatyakṣaraṁ stavasyotkīlanaṁ japtvā]

aiṁ hrīṁ śrīm aiṁ klīṁ sauḥ aiṁ -

saubhāgyalakṣmīḥ saundaryanidhiḥ samarasapriyā |
sarvakalyāṇanilayā sarveśī sarvamaṅgaḻā || 1 ||

sarvavaśyakarī sarvā sarvamaṅgaḻakāriṇī |
sarvavidyādānadakṣā saṅgatopaniṣatpriyā || 2 ||

sarvabhūtahṛdābhāsā sarvagīrvāṇapūjitā |
samṛddhā saṅgamuditā sarvalokaikasaṁśrayā || 3 ||

saptakoṭimahāmantrasvarūpā sarvasākṣiṇī |
sarvāṅgasundarī sarvagatā satyasvarūpiṇī || 4 ||

samā samayasamvedyā samayajñā sadāśivā |
saṅgītarasikā sarvakalāmayaśukapriyā || 5 ||

candanālepasarvāṅgī saccidānandarūpiṇī |
kadambavāṭīnilayā kamalākāntasevitā || 6 ||

kaṭākṣotpannakandarpā kaṭākṣitamaheśvarā |
kalyāṇī kamalāsevyā kalyāṇācalavāsinī || 7 ||

kāntā kandarpajananī karuṇārasasāgarā |

kalidoṣaharā kāmyā kāmadā kāmarūpiṇī || 8 ||

kadambakalikottamsā kadambakusumapriyā |
kadambamālārasikā kāmākṣī kamalāsanā || 9 ||

kambukaṇṭhī kalālāpā kamalāsanapūjitā |
kātyāyanī keḻiparā kamalākṣasahodarī || 10 ||

kamalākṣī kalārūpā kokaśābakucadvayā |
komalā kokilālāpā kumārajananī śivā || 11 ||

sarvajñā satatonmattā sarvaiśvaryapradāyinī |
sudhāpriyā surārādhyā sukeśī surasundarī || 12||

śobhanā śuddhidā śuddhā śuddhacaitanyarūpiṇī |
vedavedyā vedamayī vidyādharagaṇārcitā || 13 ||

vedāntasārā viśveśī viśvarūpā virūpiṇī |
virūpākṣapriyā vandyā vindhyācalanivāsinī || 14||

vīṇānādavinodajñā vīṇāgānaviśāradā |
vīṇāvatī bindurūpā brāhmaṇī brāhmaṇapriyā || 15 ||

pārvatī paramā'cintyā parāśaktiḥ parātparā |
parānandā pareśānī parāvidyā parā'parā || 16 ||

bhaktipriyā bhaktigamyā bhaktānāṁ paramāgatiḥ |
bhavā bhavapriyā bhīruḥ bhavasāgaratāriṇī || 17 ||

bhayaghnī bhāvadā bhavyā bhāminī bhaktapālinī |
bhedaśūnyā bhedahantrī bhāvanā munibhāvitā || 18 ||

māyā maheśvarī mānyā mātaṅgī malayālayā |
mahanīyā madonmattā mantriṇī mantranāyikā || 19 ||

mahānandā manogamyā mataṅgakulamaṇḍanā |
manojñā māninī mādhvī sindhumadhyakṛtālayā || 20 ||

madhuvratā madhuprotā mādhvīrasamadālasā |
pūrṇacandrābhavadanā pūrṇā puṇyaphalapradā || 21 ||

pulomajārcitā pūjyā puruṣārthapradāyinī |
nārāyaṇī nādarūpā nādabrahmasvarūpiṇī || 22 ||

nityā navanavākārā nityānandā nirākulā |
niṭilākṣapriyā netrī nīlendīvaralocanā || 23 ||

tamālakomalākārā taruṇī tanumadhyamā |
taṭitpiśaṅgavasanā taṭitkoṭisamadyutiḥ || 24 ||

madhurā maṅgaḻā medhyā madhupānapriyā satī |
citkalā cāruvadanā sukharūpā sukhapradā || 25 ||

kūṭasthā kaulinī kūrmapīṭhasthā kuṭilālakā |
śāntā śāntimatī śāntiḥ śyāmalā śyāmalākṛtiḥ || 26 ||

śaṅkhinī śāṅkarī śaivī śaṅkhakuṇḍalamaṇḍitā |
kundadantā komalāṅgī kuharā kulayoginī || 27 ||

nigarbhayoginīsevyā nirantarasukhapriyā |
śivadūtī śivakarī jaṭinī dhūrjaṭipriyā || 28 ||

śāmbhavī yoganilayā parā caitanyarūpiṇī |
daharākāśanilayā dharmarūpā darasmitā || 29 ||

sampatkarī gajārūḍhā sāndrānandā sureśvarī |
campakodbhāsitakacā candraśekharavallabhā || 30 ||

cārurūpā cāruratiḥ candrikā śambhumohinī |
vimalā viduṣī vāṇī kamalā kamalālayā || 31 ||

karuṇāpūrṇahṛdayā kāmeśī kambukandharā |
rājarājeśvarī rājamātaṅgī rājavallabhā || 32 ||

sacivā saciveśānī sacivatvapradāyinī |
pañcabāṇārcitā bālā pañcamī paradevatā || 33 ||

umā haimavatī gaurī saṅgītajñā sarasvatī |
kavipriyā kāvyakalā kaulasiddhipradāyinī || 34 ||

lalitāmantriṇī ramyā lalitārājyapālinī |
lalitāsevanaparā lalitājñāvaśaṁvadā || 35 ||

lalitākāryacaturā lalitābhaktapālinī |
lalitārdhāsanārūḍhā lāvaṇyarasaśevadhiḥ || 36 ||

rañjanī lālitaśukā nīlacūḻībharānvitā |
rāginī ramaṇī rāmā ratirājasukhapriyā || 37 ||

bhogadā bhogyadā bhūmipradā bhūṣaṇaśālinī |
puṇyalabhyā puṇyakīrtiḥ purandarapureśvarī || 38 ||

aiṅkārī sarvajananī klīṅkārī klinnarūpiṇī |
bhānumaṇḍalamadhyasthā bhāminī bhāratī dhṛtiḥ || 39 ||

nārāyaṇārcitā nāthā nādinī nādarūpiṇī |

pañcakoṇasthitā lakṣmīḥ purāṇī puravairiṇī || 40 ||

cakrasthitā cakra rūpā cakriṇī cakranāyikā |
ṣaṭcakramaṇḍalāntasthā brahmacakranivāsinī || 41 ||

antarabhyarcanaprītā bahirarcanalolupā |
pañcāśatpīṭhamadhyasthā mātṛkāvarṇarūpiṇī || 42 ||

mahādevī mahāśaktiḥ mahāmāyā mahāgatiḥ |
mahārūpā mahādīptiḥ mahālāvaṇyaśālinī || 43 ||

māhendrī madirātṛptā madirāsindhuvāsinī |
madirāmodavadanā madirāpānatatparā || 44 ||

duritaghnī duḥkhahantrī dūtīyāgaratipriyā |
vīrasevyā vighnaharā yogiṇīgaṇasevitā || 45 ||

nijavīṇāravānādanimīlitavilocanā |
vajreśvarī vaśyakarī sarvacittavimohinī || 46 ||

śabarī śabarārādhyā śābarīmantrasaṁstutā |
tripurāmantrajapinī tripurārcanatatparā || 47 ||

trilokeśī trayīmātā trimūrtiḥ tridaśeśvarī |
aiṅkāriṇī sarvamātā klīṅkārī saṁvidīśvarī || 48 ||

bhaṇḍasodarasaṁhartrī bhaṇḍasainyavināśinī |
bodhā bodhakarī bodhyā budhārādhyā purātanī || 49 ||

geyacakrarathārūḍhā gurumūrtiḥ kulāṅganā |
gandharvaśāstramarmajñā gandharvagaṇasevitā || 50 ||

jaganmātā jayakarī jananī janasevitā |
śivārādhyā śivārdhāṅgī śiñjanmañjīramaṇḍitā || 51 ||

vipañcacīkalanikvāṇavimohitajagattrayā |
bhairavapremanilayā bhairavī bhāsurākṛtiḥ || 52 ||

puṣpiṇī puṣpanilayā puṇyaśravaṇakīrtanā |
kurukullā kuṇḍalinī vāgīśī nakuleśvarī || 53 ||

vyomakeśī girisutā vārtāḻī varapūjitā |
vāruṇīmadaraktākṣī vandāruvaradāyinī || 54 ||

kaṭākṣasyandikaruṇā kandarpamadavardhinī |
dūrvāśyāmā duṣṭahantrī duṣṭagrahavibhedinī || 55 ||

sarvaśatrukṣayakarī sarvasampatpravardhinī |
kabarīśobhikalhārā kalaśiñjitamekhalā || 56 ||

mṛṇālatulyadorvallī mṛḍāṇī mṛtyuvarjitā |
mṛdulā mṛtyusaṁhartrī mañjulā mañjuhāsinī || 57 ||

karpūravīṭīkabaḻā kamanīyakapolabhṛt |
karpūrarakṣodigdhāṅgī kartṛkāraṇavarjitā || 58 ||

anādinidhanā dhātrī dhātrīdharakulodbhavā |
stotrapriyā stutimayī mohinī mohakāriṇī || 59 ||

jīvarūpā jīvakarī jīvanmuktipradāyinī |
bhadrapīṭhasthitā bhadrā bhadradā bhargabhāminī || 60 ||

bhagānandā bhagamayī bhagaliṅgā bhageśvarī |
mattamātaṅgagamanā mataṅgakulamañjarī || 61 ||

rājahaṁsagatiḥ rājñī rājarājasamarcitā |
sarvātmikā hṛṣīkeśī sarvapāpavināśinī || 62 ||

sarvarogaharā sandhyā dharmiṇī dharmarūpiṇī |
pativratā pāśahantrī paramātmasvarūpiṇī || 63 ||

ācāralabhyā svācārā khecarī yonirūpiṇī |
paṇḍitā paṇḍitārādhyā pāṣaṇḍamatabhañjinī || 64 ||

śrīkarī śrīmatī raudrī bindunādasvarūpiṇī |
aparṇā himavatputrī durgā durgārtihāriṇī || 65 ||

vyālolaśaṅkhatāṭaṅkavilasadgaṇḍapālikā |
sudhākallolasallāpā sindūratilakojjvalā || 66 ||

ālaktakālaktapādā nandanodyānavāsinī |
vāsantī guhyacāritrā vasantasamayapriyā || 67 ||

dhyānaniṣṭhā dhyānagamyā dhyānadhyeyasvarūpiṇī |
dāridryahantrī daurbhāgyaśamanī dānavāntakā || 68 ||

tīrtharūpā trinayanā turyā doṣavivarjitā |
modapradāyinī medhā medinī madaśālinī || 69 ||

madhukaiṭabhasaṁhartrī mādhavī mādhavapriyā |
mahimā mahitodārā śarvāṇī śarmadāyinī || 70 ||

rudrāṇī rucirā rākā rukmabhūṣaṇabhūṣitā |
ambikā jagatāṁ dhātrī viśālākṣī viyatprasūḥ || 71 ||

sūkṣmasvarūpiṇī saumyā suruciḥ sulabhā śubhā |

bhavānī pārvatī kālī dakṣiṇā dakṣakanyakā || 72 ||

havyavāhā havirbhoktrī hāriṇī cājyadhāriṇī |
saṁsāratāriṇī nityā sarveśī samarapriyā || 73 ||

svapnasthitā jāgariṇī suṣuptā viśvarūpiṇī |
taijasī prājñabhāvasthā cetanā'cetanākṛtiḥ || 74 ||

cinmātrā cidghanā caityā cicchāyā ciccharīriṇī |
nivṛttirūpiṇī śāntiḥ pratiṣṭhā nityapuṣpiṇī || 75 ||

divyarūpā śāntyatītā kalāpañcakarūpiṇī |
hrīṅkārī hrīmmatī hṛdyā hṛcchāyā harivāhanā || 76 ||

mūlaprakṛtiravyaktā vyaktāvyaktavinodinī |
yajñarūpā yajñabhoktrī yajñāṅgī yajñarūpiṇī || 77 ||

dakṣiṇā kṣapaṇā kṣāmā kṣitiḥ śāntiḥ śrutiḥ smṛtiḥ |
ekānekā kāmakalā kalyā kālasvarūpiṇī || 78 ||

dakṣā dākṣāyaṇī dīkṣā dakṣayajñavināśinī |
gāyatrī gaganākārā gīrdevī garuḍāsanā || 79 ||

sāvitrī sakalādhyakṣā brahmāṇī brāhmaṇapriyā |
jagannāthā jaganmūrtiḥ janmamṛtyunivāriṇī || 80 ||

dṛgrūpā sṛṣṭinilayā duṣṭahantrī cirantanā |
vijñātrī vipulā vedyā vṛddhā varṣīyasī mahī || 81 ||

adhvā kuhariṇī guhyā gavāmpatiniṣevitā |
nandinī nalinī nityā nītiḥ nayaviśāradā || 82 ||

gatā'gatajñā gahanā gāndharvī garvaśālinī |
priyavratā pramāṇajñā pramā prāṇā priyaṁvadā || 83 ||

aśarīrā śarīrasthā nāmarūpavivarjitā |
nityamuktā nityaśuddhā nirlepā niravagrahā || 84 ||

icchājñānakriyāśaktiḥ indirā bandhurākṛtiḥ |
manorathapradā mukhyā māninī mānavarjitā || 85 ||

nīrāgā nirahaṅkārā nirnāśā nirupaplavā |
vicitrā citracāritrā niṣkalā nigamālayā || 86 ||

brahmavidyā brahmanāḍī bandhahantrī balipriyā |
sulakṣaṇā lakṣaṇajñā sundarabhrūlatāñcitā || 87 ||

sumitrā mālinī sīmā mudriṇī mudrikānvitā |
rajasvalā ramyamūrtiḥ jarājanmavivarjitā || 88 ||

padmālayā padmapīṭhā padminī padmapāṇinī |
viśvambharā viśvagarbhā viśveśī viśvatomukhī || 89 ||

advitīyā sahasrākṣī virāḍrūpā vimohinī |
śāstrarūpā śāstrakarī śāstrajñā śastradhāriṇī || 90 ||

vedakṛdvedavidvedyā vittajñā vittaśālinī |
viśadā vaiṣṇavī vṛddhiḥ vairiñcī vākpradāyinī || 91 ||

vikhyātā vāmanā vīrā viśvanāthā viśāradā |
mṛḍeśvarī muṇḍamālā kālakaṅkālarūpiṇī || 92 ||

maheśvaraprāṇanāḍī maheśvarapativratā |
brahmāṇḍamālinī padmā mataṅgamunisevitā || 93 ||

īśvarī caṇḍikā caṇḍī niyantrī nigamasthitā |
sarvāntaryāminī sādhyā santatiḥ santatipradā || 94 ||

tamālapallavaśyāmā tāmroṣṭhī tāṇḍavapriyā |
naṭī lāsyakarī rambhā naṭarājapriyāṅganā || 95 ||

anaṅgarūpānaṅgaśrīḥ anaṅgaiśvaryasundarī |
sāmrājyadāyinī siddhā siddheśī siddhidāyinī || 96 ||

siddhamātā siddhapūjyā siddharthā vasudāyinī |
bhaktimatkalpalatikā bhaktidā bhaktavatsalā || 97 ||

pañcaśaktyañcitapadā paramārthasvarūpinī |
ajñānatimirajyotsnā nityāhlādā nirañjanā || 98 ||

mugdhā mandasmitā maitrī mañjukeśī madhupriyā |
kalāpinī kāvyakalā kāmakeḻiḥ kalāvatī || 99 ||

akhaṇḍā nirahaṅkārā pradhānapuruṣeśvarī |
rahaḥpūjyā rahaḥkeḻī rahaḥstotrā rahaḥkriyā || 100 ||

śaraṇyā śarvarī guhyā guhāntasthā guhaprasūḥ |
svasaṁvedyā svaprakāśā svātmasthā svargadāyinī || 101 ||

niṣprapañcā nirādhārā nityā'nityasvarūpiṇī |
nirmalā sākṣiṇī nityā niṣkāmā niṣkalā kalā || 102 ||

aṣṭamūrtiramoghecchā sādhyādigaṇasevitā |
yantrarūpā tantrarūpā mantrarūpā manonmanī || 103 ||

śivakāmeśvarī devī cidrūpā cittaraṅgiṇī |

citprakāśā citsvarūpā cinmūrtiḥ cinmayī citiḥ || 104 ||

mūrtarūpā mohahantrī mukhyā kroḍamukhīsakhī |
jñānajñātṛjñeyarūpā vyomākārā vibhāsinī || 105 ||

vimarśarūpiṇī vaśyā vidhānajñā vijṛmbhitā |
ketakīkusumāmodā kastūrītilakojjvalā || 106 ||

mṛgākṣī rasikā mṛgyā mṛganābhisugandhinī |
yakṣakardamaliptāṅgī yakṣiṇī yakṣapūjitā || 107 ||

lasanmāṇikyakaṭakā keyūrojjvaladorlatā |
sindūrarājasīmantā subhrūvallī sunāsikā || 108 ||

kaivalyadā kāntimālā kaṭhorakucamaṇḍalā |
talodarī tamohantrī trayastriṁśatpurātmikā || 109 ||

svayambhūkusumāmodā svayambhūparipūjitā |
svādhyāyinī surārādhyā vīraśrīḥ vīrapūjitā || 110 ||

drāviṇī vidrumābhoṣṭhī vairiṇī viṣṇuvallabhā |
hālāmadollasadvāṇī lolā līlāvatī ratiḥ || 111 ||

lopāmudrārcitā lakṣmīḥ ahalyāparisevitā |
ābrahmakīṭajānī kailāsagirivāsinī || 112 ||

siddheśvarī nirātaṅkā niṣkalaṅkā jaganmayī |
ādilakṣmīramoghaśrīracyutā tattvarūpiṇī || 113 ||

nāmajātyādirahitā naranārāyaṇārcitā |
guhyopaniṣadudgītā lakṣmīvāṇīniṣevitā || 114 ||

ciccandramaṇḍalāntasthā cidekarasarūpiṇī |
mataṅgavaradā siddhā mahāyogīśvarī guruḥ || 115 ||

gurupriyā kulārādhyā kulasaṅketapālinī |
anaṅgaśāstratattvajñā nānāvidharatipriyā || 116 ||

nirmalā niravadyāṅgī nītijñā nītirūpiṇī |
vyāpinī vibudhaśreṣṭhā kulaśailakumārikā || 117 ||

viṣṇuprasūrvīramātā nānāmaṇivirājitā |
nāyikā nagarīsaṁsthā nityatuṣṭā nitambinī || 118 ||

pañcabrahmamayī pañcabrahmātmyaikyasvarūpiṇī |
aruṇopaniṣadudgītā sarvānugrahakāriṇī || 119 ||

pavitrā pāvanā pūtā paramātmasvarūpiṇī |
sūryenduvahninayanā śauripūjyā sudhākarī || 120 ||

sugātrī gātrarahitā suguṇā guṇavarjitā |
rakṣākarī ramyarūpā sātvikī sattvadāyinī || 121 ||

viśvātītā vyomarūpā vimānasthā vidhipriyā |
ātmabhūrajitā jiṣṇurajā svāhā svadhā sudhā || 122 ||

nanditāśeṣabhuvanā nāmasaṅkīrtanapriyā |
gurumūrtirgurumayī gurupādārcanapriyā || 123 ||

mānavī mantrajananī mahābhairavapūjitā |
nityotsavā nityapuṣṭā śyāmā yauvanaśālinī || 124 ||

mahānayā mahāmūrtiḥ mahatīsaukhyasantatiḥ |
pūrṇodarī havirdātrī gaṇārādhyā gaṇeśvarī || 125 ||

gāyinī garvarahitā svedabindūllasanmukhī |
tuṅgastanī tulāśūnyā kanyā kamalavāsinī || 126 ||

śṛṅgārarūpā śrīvidyā śrīpādā śrīnivāsinī |
trailokyasundarī bālā trailokyajananī sudhā || 127 ||

pañcakleśaharā pāśadhāriṇī pāśamocinī |
pāṣaṇḍahantrī pāpaghnī pārthivaśrīkarī kṛtiḥ || 128 ||

nirapāyā sudhālāpā sulabhā śobhanākṛtiḥ |
mahābalā bhagavatī bhavarogavināśinī || 129 ||

bhairavāṣṭakasaṁsevyā brahmāṇīparipūjitā |
vāmādiśaktisahitā vāruṇimadavihvalā || 130 ||

variṣṭhā vaśyadā vaśyā bhaktārtidamanī ditiḥ |
vairāgyanilayā jñānadāyinī jñānavigrahā || 131 ||

sarvadoṣavinirmuktā śaṅkarārdhaśarīriṇī |
sarveśvarī sarvamātā svayañjyotiḥsvarūpiṇī || 132 ||

kṣīrasāgaramadhyasthā mahābhujagaśāyinī |
kāmadhenurbṛhadgarbhā yoganidrā vasundharā || 133 ||

mahendropendrajananī mataṅgakulasambhavā |
mataṅgajātisampūjyā mataṅgakuladevatā || 134 ||

sahyavidyā vaśyavidyā siddhavidyā śivāṅganā |
sumaṅgalā ratnagarbhā sūryamātā sudhāśanā || 135 ||

khaḍgamaṇḍalasampūjyā sālagrāmanivāsinī |

durjayā duṣṭadamanī durnirīkṣyā duratyayā || 136 ||

śaṅkhacakragadāhastā viṣṇuśaktirvimohinī |
yogamāyā yogagamyā yoganiṣṭhā sudhāpradā || 137 ||

samādhiniṣṭhasaṁsevyā sarvabhedavivarjitā |
sādhāraṇī sarojākṣī  sarvajñā sarvasākṣiṇī || 138 ||

mahāsaktiḥ mahodārā mahāmaṅgaladevatā |
kalau kṛtāvataraṇā kalikalmaṣanāśinī || 139 ||

sarvadā sarvajananī nirīśā sarvatomukhī |
suguṇā sarvatobhadrā susthirā sthāṇuvallabhā || 140 ||

carācarajagadrūpā cetanā'cetanākṛtiḥ |
maheśvaraprāṇanāthā mahābhairavamohinī || 141 ||

mañjulā yauvanonmattā mahāpātakanāśinī |
mahānubhāvā māhendrī mahāmarakataprabhā || 142 ||

sarvaśaktyāsanā śaktiḥ nirālokā nirindriyā |
samastadevatāmūrtiḥ samastasamayārcitā || 143 ||

suvarcalā viyanmūrtiḥ puṣkarā nityapuṣpiṇī |
nīlotpaladalaśyāmā mahāpraḻayasākṣiṇī || 144 ||

saṅkalpasiddhā saṅgītarasikā rasadāyinī |
abhinnā brahmajananī kālakramavivarjitā || 145 ||

ajapā jāḍyarahitā prasannā bhagavatpriyā |
śrīcakravidyā śrīdevī śrīvidyā śrīvidhāyinī || 146 ||

indirā jagatīkandā saccidānandakandalī |
sadātāmbūlarasikā puṣpaśayyādhivāsinī || 147 ||

mallikākuḍmalāmodadhammillā suratapriyā |
kastūrītilakopetā stanabhāravirājitā |
nityakalyāṇanilayā varadā śyāmalāmbikā || 148 ||

|| iti śrīsaubhāyalakṣmīkalpe lakṣmīnārāyaṇasaṁvāde aṣṭasaptatitame khaṇḍe śyāmalāstavaḥ ||

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]